दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् माघकृष्णैकादशी
माघ 01 प्रविष्टांशः मङ्गलमयः भवेत्


■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-83 | 1 | जनवरी 14, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हिमाचले समूह-सी तथा समूह-डी कर्मचारिणां स्थानान्तरेषु प्रतिबन्धः अपाकृतः, अधुना सशर्त स्थानान्तरणं भविष्यति।

3 ऑपरेशन-सिंदूरः तिसृणां सेनानां पारस्पारिक कार्याचरणस्य सर्वश्रेष्ठः दृष्टान्तः प्रतिपादितः - सेनाप्रमुखः जनरल उपेन्द्र द्विवेदी

5 मकरसंक्रान्तिः भारतदेशस्य विविधप्रदेशेषु विविधनामभिः, विविधरीत्या च आचर्यते–

## 'भारत' आगामिवर्षे विश्वस्य तृतीया वृहत्तमा अर्थव्यवस्था भविष्यति - अमित-शाहः




**हिमसंस्कृतवार्ताः** - केन्द्रीय-गृह-सहकारिता-मन्त्री श्री-अमित शाहः गुजरात-राज्यस्य गान्धीनगर-जनपदस्य पेठापुरे स्थिते गुजरात-जैव-प्राविधिक-अनुसन्धान-केन्द्र बी.एस.एल. चतुः जैव-निरोधक-सौकर्यस्य उद्घाटनानन्तरं अवदत् यत् भारते जैव- प्राविधिक-क्षेत्रे अभूतपूर्वा वृद्धिः अभवत्, येन देशस्य कृते बहवः नूतनाः अवसराः सृजिताः। श्री-शाहः अवदत् यत् भारतस्य जैव-अर्थव्यवस्था, या चतुर्दशाधिक-द्विसहस्रतमे वर्षे दश-खर्बुदः-अमरीकी डॉलर-परिमिता आसीत्, सा चतुर्विंशत्यधिक-द्विसहस्रतमवर्षस्य अन्ते पञ्चषष्टि-खर्बुदः-अमेरिकी डॉलर-पर्यन्ता वर्धिता। श्रीशाहः अवदत् यत् नवम उद्घाटितं बी.एस.एल. चतुः प्रयोगशालाकेंद्रं पुणे-नगरात् परं देशस्य द्वितीयं बृहत्तमम् एतादृशं केन्द्रम् अस्ति, यत् भारतस्य स्वास्थ्य क्षेत्रस्य संरक्षणे महत्त्वपूर्णं योगदानं करिष्यति। गुजरात-राज्यस्य त्रिदिवसीय यात्रायां आगतः श्री-शाहः पूर्वं गान्धीनगर-जनपदस्य मनसा नगरपालिकायां षष्ट्यधिक-द्विशत-कोटि-रूप्यकाणां विकास-परियोजनानां उद्घाटनं शिलान्यासं च कृतवान्।

## संसदीय कार्य-अल्पसंख्यक-प्रकरणानां केन्द्रीय मन्त्रिणा विकसित भारत-जी. राम.जी. अधिनियमे जनानां पथभ्रष्ट-करणाय आलोचना प्रकटिता




संसदीय कार्य-अल्पसंख्यक प्रकरणानां केन्द्रीय मन्त्रिणा किरेन रिजिजूः विपक्षि-दलानां विकसित भारत-जी. राम.जी. अधिनियमे जनानां पथभ्रष्ट-करणाय आलोचना प्रकटिता, प्रोक्तञ्च यत् जनाः सपद्येव अधिनियमस्यास्य लाभाः जानीयुः, एवः अधिनियमः ग्रामीण भारते वृत्यवसराणि, विकास-परिदृश्यतां च परिवर्तयिष्यति। केन्द्रीय मन्त्री उत्तरप्रदेशे लखनऊनगरे अस्मिन् अधिनियम सन्दर्भे एकं वार्ताहर-सम्मेलनं सम्बोधयति स्म। अधिनियमस्य लाभान् अभिव्यक्ता तेन भणितं यत् पुरातनी मनरेगा योजना भ्रष्टाचार-प्रतीका सञ्जातास्ति। अशेष राष्ट्र अस्य अधिनियमस्य स्वागतं करोति।

## विद्युत्-सूचनाप्रौद्योगिकी-मन्त्री अश्विनी वैष्णवः अमेरिकादेशस्य राष्ट्रपतेः सहायकेन माइकल क्रैट्सियोस इत्यनेन सह व्हाइट-हाउस इत्यत्र मिलितवान्



विद्युत्-सूचनाप्रौद्योगिकी-मन्त्री अश्विनी वैष्णवः अमेरिकादेशस्य राष्ट्रपतेः सहायकेन माइकल क्रैट्सियोस इत्यनेन सह व्हाइट-हाउस इत्यत्र मिलितवान्। तौ च भारते भविष्यति वैश्विक कृत्रिम बुद्धिमत्ता-प्रभाव-शिखर सम्मेलनस्य विषये चर्चा कृतवन्तौ। श्री-वैष्णवः वाशिङ्ग्टन्-डी.सी. नगरे कोष-सचिवेन स्कॉट-बेसेंट इत्यनेन आयोजिते महत्त्वपूर्ण-खनिज-मन्त्रिस्तरीय-सम्मेलने अपि भागं गृहीतवान्। दुर्लभ-भू-तत्त्वैः सह महत्त्वपूर्ण खनिजानां वैश्विक आपूर्ति-शृङ्खलानां सुदृढीकरणम् अस्य सम्मेलनस्य केन्द्र विन्दुः आसीत्। अस्मिन् अवसरे श्री-वैष्णवः अवदत् यत् देशस्य विनिर्माण-क्षमतायाः तथा द्रुतगत्या वर्धमानस्य विद्युत् क्षेत्रस्य सुदृढीकरणाय महत्त्वपूर्ण-खनिज-आपूर्ति-शृङ्खलायाः सुदृढीकरणम् अत्यन्तं आवश्यकम् अस्ति।

## भारतस्य अध्यक्षतायां प्रवर्तमान वर्षीय-ब्रिक्स-सम्मेलने स्थिलता, नवाचार, सहयोग-स्थिरता च प्रमुखाः प्राथमिकताः भविष्यन्ति- विदेशमंत्री एस. जयशंकरः।




**हिमसंस्कृतवार्ताः** - विदेशमन्त्रिणा डॉ.एस. जयशंकरेणोक्तं यत् भारतस्य अध्यक्षतायां प्रवर्तमान वर्षीय ब्रिक्स सम्मेलने स्थिलता, नवाचार, सहयोग-स्थिरता च प्रमुख प्राथमिकताः भविष्यन्ति। ब्रिक्स शिखरोपवेशनस्य लोगो इति प्रतीकचिह्न, प्रमुख-स्थायी आधारं वेबफलकस्य च उद्घाटनावसरे श्री जयशंकरेणोक्तं यत् एताः प्राथमिकताः समूहस्य मूल त्रयाणां स्तंभानां- राजनीतिक-सुरक्षा, आर्थिक-वित्तीय-सांस्कृतिक-जनसमुदायस्य आदान-प्रदानाय च एकं सुव्यवस्थित संरचनां प्रदास्यन्ति। तेन एतदपि भणितं यत् भारतदेशः शिखर सम्मेलन-कालावधी वैश्विक कल्याणाय ब्रिक्स देशानां क्षमता सम्भूय करणार्थ प्रदास्यति।

## राष्ट्रीय अन्वेषण अभिकरणेन अवैध बांग्लादेशी-प्रवेश-प्रकरणान्वीक्षणं दिल्ली आरक्षिदलेन निभाल्य प्राथमिकी पञ्जीकृता




**हिमसंस्कृतवार्ताः** - राष्ट्रिय-अन्वेषण-अभिकरणस्य एकस्य प्रमुखस्य अवैध-बाङ्ग्लादेशीय-प्रवासन-चक्रस्य अन्वेषणं स्वीकृतम्। अस्य प्रकरणस्य अन्वेषणं पूर्व दिल्ली-आरक्षकस्य विशेष-प्रकोष्ठेन कृतम् आसीत्। अधिकारिणः दृढीकृतवन्तः यत् गतसप्ताहे औपचारिकरूपेण प्रकरणस्य कार्यभारं स्वीकृत्य राष्ट्रिय-अन्वेषण-अभिकरणेन नूतनं प्रथम-सूचना-प्रतिवेदनं पञ्जीकृतम्। अवैध-प्रवासनस्य प्रोत्साहनं कुर्वता तथा सम्भाव्यं राष्ट्रीय सुरक्षा-प्रतिरोधं जनयता सङ्गठित समूहानां निवार्णार्थं गृहमन्त्रालयस्य निर्देशानुसारं एतत् कार्यं कृतम्।

## सुभाषितम्

**पितृभिः ताडितः पुत्रः,**
**शिष्यस्तु गुरुशिक्षितः।**
**घनाहतं सुवर्णं च,**
**जायते जनमण्डनम्।।**

अर्थात्- पिता द्वारा पीटा गया पुत्र, गुरु द्वारा शिक्षित शिष्य और हथौडे से पीटा गया सोना अवश्य ही आभूषणरूप बनता है।




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## लक्षद्वीपे बहुस्तरीय-संयुक्त सैन्य-सेवा-चिकित्सा-शिविरस्य उद्घाटन-समारोहः संबोधितवान् रक्षामन्त्री राजनाथसिंहः



**हिमसंस्कृतवार्ताः** - रक्षामन्त्री राजनाथसिंहः दृश्य-श्रव्य-सञ्चार माध्यमेन लक्षद्वीपे बहुस्तरीय-संयुक्त सैन्य-सेवा-चिकित्सा-शिविरस्य उद्घाटन-समारोहः संबोधितवान्। अवसरे अस्मिन् श्री राजनाथसिंहेन प्रोक्तं यत् भारतीय नौसेना द्वारा समायोजितं इदं शिविरं दूरस्थेषु क्षेत्रेषु निवसितेषु नागरिकेषु भद्रतम-स्वास्थ्य सेवा प्रदान करणस्य इति सर्वकारस्य प्रतिबद्धतां प्रदर्शयति।

# हिमाचले समूह-सी तथा समूह-डी कर्मचारिणां स्थानान्तरेषु प्रतिबन्धः अपाकृतः, अधुना नियमैः स्थानान्तरणं भविष्यति

**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेश-राज्यसर्वकारेण कर्मचारिणां स्थानान्तरेषु आरोपितः प्रतिबन्धः अपाकृतः। अस्य विषयस्य अधिसूचना मङ्गलवारे कार्मिकविभागेन निर्गता। सर्वकारेण निश्चयं कृतं यत् शिक्षाविभागं तथा तकनीकीशिक्षा- विभागस्य अध्यापनसंवर्गं विहाय, समूह– सी, समूह– डी श्रेण्यां नियोजितानां कर्मचारिणां स्थानान्तरणानाम् अनुमतिं सम्बन्धिताः मन्त्रिणः ३१ मार्च २०२६ पर्यन्तं दातुं शक्नुवन्ति। अस्मिन् अवधौ, निर्धारितानां शर्तानां कठोरपालनं कृत्वा, सम्बन्धिताः मन्त्रिणः सामान्य-स्थानान्तरण- आदेशान् निर्गन्तुं समर्थाः भविष्यन्ति।

## स्थानान्तरणेषु पालननीया नियमाः-

स्थानान्तरण- आदेशाः पूर्णतया “व्यापक- मार्गदर्शक- सिद्धान्त– २०१३” इति नियमावल्यनुसारं दातव्याः, या १० जुलाई २०१३ तमे दिने परिपत्ररूपेण प्रेषिता आसीत् तथा कालानुसारं संशोधिता च। स्थानान्तरण- आदेश- निर्गमकाले, कस्यचित् अधिकारिणः अथवा कर्मचारिणः त्रिवर्षीयं सामान्य-कार्यकालं (स्टे) अवश्यं विचारणीयम्। प्रभारी-मन्त्रिणः स्व- स्व- विभागेषु तेषां सर्वेषां नियमित समूह– सी, समूह– डी कर्मचारिणां च स्थानान्तरणानां अनुमोदन- निर्णयार्थं अधिकृताः सन्ति, ये वर्तमान-पदस्थाने स्वं सामान्य- कार्यकालं पूर्णं कृतवन्तः। अस्मिन् अन्तर्गतं शिक्षाविभागस्य, तकनीकी- शिक्षाविभागस्य अध्यापनसंवर्गः न समाविष्टः।

## कर्मचारी स्वविभागे प्रत्यक्षम् आवेदनं कर्तुं शक्नुवन्ति-

प्रशासनिक-आवश्यकतानां दृष्ट्या स्थानान्तरणानि न्यूनतमसंख्यायामेव भविष्यन्ति, तथा कस्यापि परिस्थितौ विभागस्य संवर्ग-संख्या-त्रिशतांशात् (३%) अधिकानि न भविष्यन्ति। एषा सीमा कदापि न उल्लङ्घनीया इति सुनिश्चितं कर्तुं सम्बन्धित- विभागस्य/ निगमस्य/ बोर्डस्य/ विश्वविद्यालयस्य व्यक्तिगतं दायित्वं भविष्यति। अल्पकालीन- निवासः, न्यूनदूरी इत्यादिषु शिथिलता अथवा क्षमायाः प्रसङ्गे, नियमावलीनुसारं प्रभारी-मन्त्रिणः माध्यमेन मुख्यमन्त्रिणः अनुमतिं प्राप्य एव स्थानान्तरणं कर्तव्यम्। कर्मचारी स्वयमेव स्वविभागे स्थानान्तरणार्थम् आवेदनं कर्तुं शक्नुवन्ति।कार्मिकविभागेन सर्वेभ्यः प्रशासनिक-सचिवेभ्यः, विभागाध्यक्षेभ्यः, मण्डलीय-प्रबन्धकेभ्यः, उपायुक्तेभ्यः च निर्देशाः दत्ताः यत् एते आदेशाः सर्वेषां सम्बन्धितानां अवधानाय आनयन्तु तथा तेषां कठोरं पालनं सुनिश्चितं कुर्वन्तु। एते निर्देशाः विभागीय-जालस्थले www.himachal.nic.in/personnel इत्यत्र अवलोकनीयाः सन्ति।

# एचआरटीसी- कर्मचारिणां परिचयपत्राणाम् उन्नयनं क्रियन्ते- उपमुख्यमन्त्री मुकेश अग्निहोत्री



**हिमसंस्कृतवार्ताः- शिमला।** उपमुख्यमन्त्री मुकेश अग्निहोत्री इत्यनेन उक्तं यत् एचआरटीसी-कर्मचारिणां कृते विद्यमानव्यवस्था समाना एव भविष्यति। कर्मचारिणां कृते हिमबसकार्ड तेषां यात्रया सह सम्बद्धं नास्ति। पूर्वं कर्मचारिणां कृते परिचयपत्राणि निर्गतानि सन्ति, परन्तु एतेषां पत्रकाणां नूतनप्रौद्योगिक्या उन्नयनं क्रियन्ते। पुलिसकर्मचारिणां कृते निर्गतस्य हिमबसकार्डस्य विषये सः अवदत् यत् निगमप्रबन्धनेन सह परामर्शं कृत्वा पृथक् अन्वेषणं भविष्यति। सः सचिवालये पत्रकारसम्मेलने एतत् वक्तव्यं दत्तवान्। सः अवदत् यत् राज्ये प्रतिदिनं एचआरटीसी बसयानेषु ५ लक्षं यात्रिकाः गच्छन्ति। एच. आर. टी. सी. इत्यनेन २८ प्रकारस्य अपकर्षं दातव्यं भवति। अत्र बहूनि क्षेत्राणि सन्ति यत्र निजीसञ्चालकाः बसयानानि न चालयन्ति, परन्तु एचआरटीसी बसयानानि तत्र प्रचलन्ति। अग्निहोत्री इत्यनेन उक्तं यत् एकं विद्युत्बसयानं परीक्षणरूपेण हिमाचलम् आगतम् अस्ति, तस्य परीक्षणं ३६ स्थानेषु भविष्यति। पर्वतीयक्षेत्रेषु बसस्य क्षमता, चार्जिंग्, व्यावहारिकता च आकलनाय अर्की, सोलनम् सराहां इत्यादिषु क्षेत्रेषु परीक्षणं क्रियते सिरमौरस्य हरिपुरधारे बसदुर्घटनायाः विषये सः अवदत् यत् अन्वेषणस्य आदेशः दत्तः अस्ति। दुर्घटनायां चतुर्दश जनाः मृताः। अतिभारः एव प्राथमिककारणं दृश्यते। अपि च मार्गे हिमपातेन बसयानस्य स्खलनं भवितुम् शक्यते। उपमुख्यमन्त्री उक्तवान् यत् राज्ये १४८ कृष्णबिन्दवः चिह्निताः, येषु १४७ बिन्दूनां पुनर्स्थापनं कृत्वा दुर्घटनाबाधाः स्थापिताः। मार्गसुरक्षाविषये नियमितरूपेण सभाः भवन्ति, परामर्शार्थं च संघेभ्यः प्रस्तावाः प्रेषिताः भविष्यन्ति।

## एचआरटीसी इत्यस्य समूहात् ५०० बसयानानि निवृत्तानि भविष्यन्ति-


उपमुख्यमन्त्री अवदत् यत् एचआरटीसी-संस्थायां प्रायः ३२०० बसयानानि सन्ति, येषु प्रायः ५०० बसयानानि निवृत्तानि भवितुम् अर्हन्ति। मासे १५ वर्षाणि यावत् अथवा ९,००,००० किलोमीटर यावत् सेवायां स्थापितानां बसयानानां निष्कासनं आवश्यकम् अस्ति। यावत् विद्युत्बसयानानि, २५० लघुबसयानानि च न प्रवर्तन्ते तावत् पुरातनबसयानानि पूर्णतया समाप्तुं न शक्यन्ते। तदर्थं शीघ्रमेव निविदाप्रक्रिया आरभ्यते। केन्द्रसर्वकारस्य नीतेः अन्तर्गतं बहिः राज्यानां बसयानानां कृते ₹३ लक्षं निक्षेपं दत्त्वा मार्गं चालयितुं अनुमतिः आसीत्, यस्य पदस्य हिमाचलप्रदेशः विरोधं कृतवान् अधुना दिल्लीतः यात्रिकाणाम् आरक्षणस्य स्थाने एतानि बहिः बसयानानि मार्गे यात्रिकान् उद्धृत्य हिमाचल-बसयानानां हानिम् अनुभवन्ति। सः अवदत् यत् हिमाचलबसयानानां यात्रिकान् ग्रहीतुं अधिकारः अस्ति, न तु बहिर्राज्यस्य बसयानानां। राज्यसर्वकारः सम्प्रति न्यायालये अस्य विषयस्य विरुद्धं युद्धं कुर्वन् अस्ति।

# भाजपादलस्य तृणमूलकांग्रेस-दलस्यारोपाः प्रत्यारोपाः





भाजपा-दलेन तृणमूल कांग्रेस-दलस्य उपरि देशस्य लोकतान्त्रिक-व्यवस्थां दुर्वलं कर्तुं प्रयत्नः क्रियते इति आरोपः कृतः। नवदिल्ल्यां वार्ताहारैः सह संवादं कुर्वन् भाजपा-दलस्य प्रवक्ता तुहिन-सिन्हा अवदत् यत् तृणमूल्-कांग्रेस-दलस्य प्रमुखा तथा पश्चिमबङ्गालस्य मुख्यमन्त्रिणी ममता बनर्जी कथितरूपेण राजनैतिक-परामर्शी-संस्थायाः आई-पैक इत्यस्य कार्यालये धनशोधन-प्रकरणे प्रवर्तन निदेशालयेन कृतस्य अन्वेषणस्य समये हस्तक्षेपम् अकरोत्।

# जम्मूकश्मीरे पञ्चप्राशासनिक-कर्मचारिणः निलम्बिताः



जम्मू-कश्मीरस्य उपराज्यपालेन मनोजसिन्हा-वर्येण प्रतिबन्धित-आतंकवादी संघटनेन साकं कथित-सक्रिय सम्बन्धानां कृते पञ्चप्राशासनिक-कर्मचारिणः निलम्बिताः। आकाशवाण्याः जम्मूवार्ताहर-वक्तव्ये प्राकाशितम् यत् निलम्बितेषु कर्मचारिषु एकः, प्रयोगशाला-प्राविधिक कर्मचारी, एकश्य सहायकः वनविभागस्यापि एकः कर्मचारी समाविष्टः। अपश्य चिकित्सा-शिक्षा-विभागे चालकः वर्तते, असी वर्तमाने श्री नगरे हिजबुल मुजाहिदीनस्य सूच्यां वर्तते। अस्य पाकिस्तानीय आतंकिभिः सम्पर्कोऽपि विद्यते।

# अमरीकी राष्ट्रपतिना डॉनल्ड ट्रम्पेण घोषणा विहिता यत् यो देशः ईरानदेशेन सह व्यापार-सम्बन्धाः स्थास्यन्ति, तेभ्यः संयुक्त-राज्य-अमेरिकाया साकं पञ्चविंशतिः प्रतिशन्मितं टैरिफ-इत्यस्य सम्मुखीकरणार्थ सन्नधं भवितव्यम्



**हिमसंस्कृतवार्ताः -** अमरीकी राष्ट्रपतिना डॉनल्ड ट्रम्पेण घोषणा विहिता यत् यो देशः ईरानेव सह व्यापार-सम्बन्धाः स्थास्यन्ति। तेभ्यः संयुक्त-राज्य-अमेरिकाया साकं पञ्चविंशतिः प्रतिशन्मितं टैरिफ-इत्यस्य सम्मुखीकरणार्थ सन्नधं भवितव्यम्। यत्तोहि वाशिंगटन-नगरः देशस्य प्राशासनिक-विरोधि-प्रदर्शनानां केन्द्रं जायते। चीन-देशः ईरानदेशस्य सर्वप्रमुख व्यापारिक-सहयोगी अस्ति। अनन्तरं इराक-संयुक्त अरब अमीरात-तुर्की-भारतदेशः च वर्तन्ते।

# HP Cabinet Meeting - मुख्यमंत्री सुक्खुः १९ जनवरी दिनाङ्के मन्त्रिमण्डलस्य गोष्ठीम् आहुतवान्

**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः १९ जनवरी दिनाङ्के प्रातः ११ वादने मन्त्रिमण्डलस्य गोष्ठीम् आहूतवान्। धर्मशालायां प्रस्तावितायाः जिप-रेखायाः, तारादेवी-शिमला-रोपवे-परियोजनायाः च अस्मिन् सत्रे अनुमोदनं भविष्यति। समाचारानुसारं २ किलोमीटरमितं व्यासस्य जिपलाइन इत्यस्य निर्माणस्य प्रस्तावः एकस्मात् कम्पनीतः आगतः अस्ति । तथैव तारादेवी-शिमला-रज्जुमार्गस्य अनुमोदनार्थं एकमेव निविदा प्राप्ता अस्ति।

## वरिष्ठनिवासीवैद्यानां नीतिसम्बद्धः प्रस्तावः सभायां आनेतुं शक्यते

चिकित्सामहाविद्यालयेषु नियुक्तानां वरिष्ठनिवासीवैद्यानां नीतिसम्बद्धः प्रस्तावः अपि सभायाम् आनेतुं शक्यते। वित्तविभागः राज्यस्य वर्तमानवित्तीयस्थितेः विषये प्रस्तुतिम् उपस्थापयिष्यति। एषा प्रस्तुतिः सर्वकारस्य आयव्ययस्य व्याख्यां करिष्यति। सर्वकारस्य प्रचलति चिट्टाविरोधी अभियानं प्रवर्तयितुं रणनीतिः अपि निर्मातुं शक्यते। पंचायतसचिवानां नियुक्तिसम्बद्धविषयाणां अतिरिक्तं आगामिबजटसत्रसम्बद्धविषयेषु अपि चर्चा भवितुं शक्नोति।

## पंचायतनिर्वाचने अपि चर्चा शक्यते

सभायां पंचायतनिर्वाचनविषये चर्चा सम्भवति। निर्वाचन-आयोगेन मन्त्रिमण्डलस्य समागमस्य एकदिनानन्तरं २० जनवरी दिनाङ्के अधिकारिणां सभा अपि आहूता अस्ति। भविष्ये राज्यसर्वकारः अपि जनानां समस्यानां निवारणाय द्वारं द्वारं गमिष्यति, उपमुख्यमन्त्री, विधानसभायाः अध्यक्षः, राज्यसर्वकारस्य मन्त्रिणः च विभिन्नजनपदेषु भ्रमणं करिष्यन्ति। अतः सभायां अनौपचारिकरूपेण अपि अस्य विषयस्य चर्चा भवितुं शक्नोति।

## मुख्यमंत्री बुधवासरे दिल्लीं प्रति प्रस्थास्यति, केन्द्रीयवित्तमन्त्रिणा सह मेलनं भविष्यति

मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः बुधवासरे दिल्लीं प्रति प्रस्थास्यति। समाचारानुसारं मुख्यमन्त्री केन्द्रीयवित्तमन्त्री निर्मलासीतारमण इत्यनया अन्यैः च कतिपयैः केन्द्रीयमन्त्रिभिः सह साक्षात्कारं करिष्यति इति अपेक्षा अस्ति। अस्मिन् काले सः विशेषवित्तीयसहायतासंकुलस्य प्रावधानं, वर्तमानऋणसीमायाः वर्धनं, प्रधानमन्त्रिणा घोषितस्य ₹1,500 कोटिरूप्यकाणां संकुलस्य शीघ्रं विमोचनं च अनुरोधयिष्यति। तदतिरिक्तं न्यूजीलैण्ड्देशात् आयातितानां सेबानां शतप्रतिशतम् आयातशुल्कवृद्धेः विषये सः केन्द्रीयवाणिज्यमन्त्रिणा सह मिलितुं शक्नोति। दिल्ली-भ्रमणकाले मुख्यमन्त्री काङ्ग्रेस-उच्च-नेतृत्वेन सह सत्ता-सङ्गठन-सम्बद्धेषु विषयेषु चर्चां कर्तुं शक्नोति ।

# ऑपरेशन-सिंदूरः तिसृणां सेनानां पारस्पारिक कार्याचरणस्य सर्वश्रेष्ठः दृष्टान्तः प्रतिपादितः - सेनाप्रमुखः जनरल उपेन्द्र द्विवेदी




**हिमसंस्कृतवार्ताः -** सेनाप्रमुखः जनरल उपेन्द्र द्विवेदीः प्रतिपादितवान् यत् ऑपरेशन-सिंदूरः तिसृणां सेनानां सम्भूय कार्याचरणस्य सर्वश्रेष्ठः दृष्टान्तः वर्तते। तेन पुनः व्याहृतं यत् पाकिस्तानस्य कस्यापि दुस्साहसस्य दृढ-प्रत्युत्तरं प्रदास्यते। अत्र अभियानान्तरेण सेना केनापि प्रकारेण प्रत्युत्तराय पूर्णतया स्वतन्त्रा अवर्तत। नवदिल्ल्यां अद्य वार्ताहरैः सम्बोधयन् जनरल उपेन्द्र द्विवेदी भणितवान् यत् मई दश-दिनांकात् पश्चिम-जम्मू-कश्मीरे स्थितिः संवेदनशीला वर्तते। साम्प्रतं स्थितिः नियन्त्रिता वर्तते। तेन प्रोक्तं यत् गत वर्षे एक-त्रिंशत् आतंकिनः मारिताः, एतेषु पञ्चषष्टिः प्रतिशन्मिताः पाकिस्तानीय मूल-निवासिनः आसन्।

# विकसित-भारतस्य स्वप्नः तदैव सार्थकः भविष्यति यदा देशस्य यूनः मादक द्रव्याणि पूर्णतयाः त्यजन्ति- उपराष्ट्रपतिः




उपराष्ट्रपतिः सी.पी.राधाकृष्णन् प्रोक्तवान् यत् विकसित-भारतस्य स्वप्नः तदैव सार्थकः भविष्यति यदा देशस्य यूनः मादक द्रव्याणि पूर्णतयाः त्यजन्ति। श्री राधाकृष्णन् राष्ट्रिय-राजधान्यां दिल्ली विश्वविद्यालयस्य मादक-मुक्त-परिसर-अभियां संबोधयति स्म। उपराष्ट्रपतिना प्रोक्तं यत् अभियानमिदं मादक-मुक्त-भारताभियानेन साकं सम्पृक्तं विद्यते। तेन सबलं प्रोक्तं यत् मादक औषधीनां दुरुपयोगः सामाजिक आह्वानं, सार्वजनिक स्वास्थ्य चिन्ता, देशस्य जनसांख्यिकीय लाभांशय हानिकारको विद्यते।

# बृहत् वस्तु-उपलब्धता अनुबन्धः, दश-निमेषात्मिका समयसीमा गिग-कर्मचारिणां सुरक्षायै प्रशासनेन सहमतिः प्रकटिता




**हिमसंस्कृतवार्ताः -** दश-निमेष-वस्तूनां उपलब्धता इति प्रशासनस्य अनेका सेवाः सन्धिपत्र-अनुबन्धे प्रशासनेन अन्तिमा तिथिः निस्सारणाय सहमतिः प्रकटिता। प्राशासनिक स्रोतांसि सूचयन्ति यत् उपलब्धता-समयसीमातः सम्पृक्त चिन्ताः दूरी कर्तुं ब्लिंकिट-जैप्टो-जौमेटो-स्विगी सदृश-सेवा धारकैः समं वृहत्तम्-मञ्चे विचारणा जाता। अस्योद्देश्यं सुरक्षा-भद्रकार्यञ्च सुनिश्चितं करणं वर्तते।

# हिमाचलस्य मार्गाः स्थायित्वं प्राप्स्यन्ति, १० वर्षाणि यावत् क्षतिग्रस्ताः न भविष्यन्ति; द्वयोः नूतनयोः आधुनिक-प्रौद्योगिक्योः उपयोगः भविष्यति- विक्रमादित्यसिंहः



**हिमसंस्कृतवार्ताः- शिमला।** लोकनिर्माणमन्त्री विक्रमादित्यसिंहः अवदत् यत् क्षतिग्रस्तमार्गाणां पुनर्स्थापनार्थं परीक्षणार्थं 'सीमेंट ग्राउटेड बिटुमिनस मैकाडम इत्यस्य (सीजीबीएम) तथा स्टेबिलाइज्ड-बेस- लेयर- प्रौद्योगिकी इत्येतयोः आधुनिकप्रभाविप्रौद्योगिकयोः चयनं कृतम् अस्ति। प्रारम्भे शोघी-मझहली-मार्गे एतासां प्रौद्योगिकीनां उपयोगः क्रियते।

सः अवदत् यत् लोकनिर्माणविभागः राज्ये प्रायः ३५,००० किलोमीटर्पर्यन्तं मार्गाणां परिपालनं करोति, मार्गस्य गुणवत्तां परिष्कर्तुम्, सर्वर्तुसंपर्कं च निर्वाहयितुम् निरन्तरं प्रयतते। एतस्याः प्रौद्योगिक्याः कारणात् हिमाचलस्य मार्गाः स्थायित्वं प्राप्स्यन्ति, न्यूनातिन्यूनं १० वर्षाणि यावत् क्षतिग्रस्ताः न भविष्यन्ति। एतां सूचनां मन्त्री सचिवालये मीडियाभिः सह प्रकटितवान्। लोकनिर्माणमन्त्री उक्तवान् यत् राज्यस्य प्रायः २०% मार्गाः प्रतिकूलर्तौ: जलप्रवेशस्य च कारणेन पुनः पुनः क्षतिग्रस्ताः भवन्ति, अतः नित्यं पुनर्स्थापनस्य आवश्यकता भवति। एतेन अनुरक्षणव्ययः वर्धते। अस्याः समस्यायाः स्थायी समाधानं प्राप्तुं दीर्घकालीनसमाधानरूपेण नवीनाः स्थायिमार्गनिर्माणप्रौद्योगिकीः स्वीक्रियन्ते। केन्द्रीयमार्गसंशोधनसंस्थया सह चर्चां कृत्वा शोघी-मोहलीमार्गस्य क्षतिग्रस्तखण्डेषु एतासां प्रौद्योगिकीनाम् उपयोगेन प्रायोगिकपरियोजना आरब्धा अस्ति। एताः प्रौद्योगिक्यः मार्गाः सुदृढाः, भारवाहकयातायातस्य नियन्त्रणं कर्तुं समर्थाः च भविष्यन्ति। ते जलक्षतिविरुद्धं उत्तमं रक्षणमपि दास्यन्ति, येन नित्यं पुनर्स्थापनस्य आवश्यकता न भवति। कथ्यते यत् एताभिः प्रौद्योगिकीभिः निर्मिताः मार्गाः प्रायः १० वर्षाणि यावत् अक्षतिग्रस्ताः एव तिष्ठन्ति, येन अनुरक्षणव्ययः न्यूनीभवति, जनसामान्यस्य कृते सुरक्षितः विश्रामदायकः च यात्रा-अनुभवः प्राप्यते।

## हास्यकणिका -डॉ.विदुषी अग्रवालः
## पति-पत्न्योः मध्ये हासपरिहासम्

**पत्नी** (सा आनन्दमग्ना अस्ति, परिहासं कर्तुम् इच्छति 🥱) - भवतः तु कोटिः बालकाः सन्ति?

**पतिः** 😱 😨 - कथम्?

**पत्नी** - भवान् तु सदैव वदति खलु - मशकाः केवलं मम रक्तपानं कुर्वन्ति , तर्हि यदि मशकानां शरीरे भवतः रक्तम् अस्ति तर्हि सर्वाः मशकाः भवतः बालकाः सन्ति, अतः भवतः कोटिः बालकाः सन्ति 👿 👿 👿 👿 👿 👿 👿 👿

**पतिः** - 🙄 😖 😳 😳 😳 😳

# मकर संक्रांतिः शास्त्रीयमहत्त्वं जीवनोपयोगिता च


डॉ.मनोजशैलः




अद्य वयं तस्य पावनकालस्य साक्षिणः स्मः, यं भारतीयमनीषिणः 'पर्व' इति कथयन्ति। 'संक्रांति' शब्दस्य व्युत्पत्तिलभ्यः अर्थः अस्ति- 'सम्यक् क्रान्तिः' अर्थात् श्रेष्ठा प्रगतिः। यदा भगवान् भास्करः धनुराशिं परित्यज्य मकरराशिं प्रविशति, तदा एषा घटना न केवलं खगोलीया, अपि तु जड़जगत्तः चेतनजगत् प्रति संक्रमणस्य उत्सवः वर्तते।

## १. वैदिक-आधारः (सूर्यस्य महिमा)-

वेदेषु सूर्यः जगतः आत्मा इति उद्घोषितः "सूर्य आत्मा जगतस्तस्थुषश्च" (ऋग्वेद १.११५.१) अर्थात् यत् किञ्चित् गतिशीलम् अस्ति, यच्च स्थिरम् अस्ति, तस्य सर्वस्य आत्मा सूर्यः एव। मकर संक्रांतिः अस्याः 'वैश्विक-आत्मनः' पुनरुत्थानस्य पर्व अस्ति।

## २. उत्तरायणस्य शास्त्रीय-महत्त्वम्-

अस्मात् दिनात् सूर्यः 'उत्तरायणः' भवति। शास्त्रेषु अयं 'देवयान मार्गः' इति कथितः। श्रीमद्भगवद्गीतायां श्रीकृष्णः अस्य कालस्य महिमां वर्णयति-

**अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्। तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः॥ (गीता ८.२४)**

अस्य अर्थः अस्ति यत् उत्तरायणस्य प्रकाशमये काले शरीरत्यागं कृत्वा ब्रह्मज्ञानिनः मोक्षं प्राप्नुवन्ति। अत एव पितामह भीष्मः शरशय्यायां स्थित्वा अपि अस्य पावनकालस्य प्रतीक्षां कृतवान्।

## ३. दानस्य त्यागस्य च दर्शनम्-

अस्मिन् दिने दानस्य अक्षयपुण्यं वर्णितम् अस्ति। पद्मपुराणे उक्तम्-

**"माघे मासे महादेव यो दास्यति घृतकम्बलम्। स भुक्त्वा सकलान् भोगान् अन्ते मोक्षं च विन्दति॥"**

अस्मिन् दिने 'तिल-दानस्य' विशेषं महत्त्वम् अस्ति, यतः तिलाः पापहारकाः उष्णताप्रदायकाः च भवन्ति।

## ४. जीवनोपयोगिता (व्यावहारिकः सन्देशः)-

मकर संक्रांतिः अस्मान् जीवनकलां शिक्षयतिः

**समरसता (खिचड़ी)**- यथा तण्डुलाः माषाः (दाल) च मिलित्वा शक्तिप्रदं भोजनं भवन्ति, तथैव समाजस्य सर्वे वर्गाः मिलित्वा राष्ट्रं सुदृढं कुर्वन्ति।

**माधुर्यम् (तिल-गुडम्):-** "तिलगुडवत् स्नेहं वर्धयन्तु" इति उक्तिः अस्मान् शिक्षयति यत् अस्माकं वाणी गुडवत् मधुरा, जीवनं च तिलवत् स्नेहपूर्णं (स्निग्धम्) भवेत्।

**लक्ष्यप्राप्तिः (पतङ्गः)**- गगने उड्डयमानः पतङ्गः सन्देशं ददाति यत् ऊर्ध्वगतये (प्रगतये) संघर्षणं तु करणीयमेव, परन्तु स्वसंस्काराणां 'सूत्रं' (डोर) कदापि न त्याज्यम्।

## अस्य पर्वणः त्रयः मुख्याः आधाराः सन्तिः-

### १. संकल्पः परिवर्तनं च (आध्यात्मिकः पक्षः)-

मकरसंक्रांतिः 'उत्तरायणस्य' प्रारम्भकालः अस्ति। शास्त्रेषु उद्घोषितम् अस्ति- 'तमसो मा ज्योतिर्गमय' इति। अर्थात् वयं अन्धकारात प्रकाशं प्रति गच्छेम। यथा सूर्यः स्वदिशं परिवर्तितुम् उत्तरदिशं प्रति अग्रसरः भवति, तथैव वयं अपि स्वजीवनस्य दिशां नकारात्मकतायाः सकारात्मकतां प्रति परिवर्तयेम। एषः दिवसः आत्ममन्थनस्य नूतनप्रारम्भस्य च अस्ति।

### २. स्वास्थ्यं विज्ञानं च (वैज्ञानिकः पक्षः)-

अस्माकं परम्पराणां पृष्ठे गभीरं विज्ञानं निहितम् अस्ति। शीतकाले तिल-गुडयोः सेवनं न केवलं रसास्वादाय, अपि तु शरीराय ऊष्मां ऊर्जां च प्रदातुं क्रियते। पतङ्गोड्डयनव्याजेन सूर्यकिरणेषु समययापनम् अस्माकं स्वास्थ्याय 'विटामिन-D' इत्यस्य प्राकृतिकः स्रोतः भवति।


### ३. एकता माधुर्यं च (सामाजिकः पक्षः)-

भारतस्य विविधां संस्कृतिं पश्यन्तु- कुत्रचित् एतत् 'पोंगल' अस्ति, कुत्रचित् 'बिहू', कुत्रचित् 'लोहड़ी' तत्रैव कुत्रचित् 'खिचड़ी' इति। नामानि अनेकानि सन्ति, परन्तु भावना एका एव। यथा तिल-गुडौ परस्परं मिलित्वा अविभाज्याः भवन्ति, तथैव वयमपि समाजे मिलित्वा वसेम। अस्मिन् दिने वयं पुरातनद्वेषं विस्मृत्य तिल-गुडवत् सम्बन्धेषु माधुर्यं स्थापयितुं संकल्पं कुर्याम।

**निष्कर्षः-** अतः इयं संक्रांतिः अस्मान् 'तमसो मा ज्योतिर्गमय' इति वैदिकमार्गे प्रेरयति। आगच्छन्तु, वयं सर्वे स्वजीवनस्य अज्ञानं दूरीकृत्य सूर्यवत् तेजस्विनः भवेम।

# प्रत्येकं क्षेत्रे सर्वकारः असफलः अभवत्,

## विरोधाभासेषु विप्रतिपन्नम् काङ्ग्रेसदलम् - जयरामठाकुरः



**हिमसंस्कृतवार्ताः - शिमला।** पूर्वमुख्यमन्त्री विपक्षनेता च जयरामठाकुरः राज्यसर्वकारे प्रत्येकस्मिन् क्षेत्रे असफलतायाः आरोपं कृतवान्। हरिपुरधार-अर्की-दुर्घटनाभिः व्यवस्थायाः, सर्वकारस्य च असंवेदनशीलता उजागरिता इति सः आरोपितवान् । शिमलातः प्रसारिते वक्तव्ये जयरामठाकुरः आरोपितवान् यत् सर्वकारः पूर्णतया आन्तरिकविरोधेषु विप्रतिपन्नः, यस्य कारणात् काङ्ग्रेसनेतारः परस्परं न्यूनं प्रदर्शयितुं, निराकरणं च कर्तुं राजनीतिषु व्यग्राः सन्ति। उपमुख्यमन्त्री, मन्त्रिणः च अधिकारीणां कार्यप्रदर्शने प्रश्नं कुर्वन्ति इति सः आरोपितवान्। सः अपि आरोपितवान् यत् येषाम् अधिकारिणां अखण्डतायाः विषये मुख्यमन्त्री स्वयमेव प्रश्नं कृतवान् ते एव अधुना तस्य निकटतमसहकारिषु सन्ति। सः आरोपितवान् यत् विगतत्रिषु वर्षेषु काङ्ग्रेससर्वकारेण हिमाचलं विनाशस्य तीरं नीतम्। जयरामठाकुरः अपि राज्यस्य जनेभ्यः लोहड़ीपर्वणः, मकरसंक्रान्ति-पर्वणः च शुभकामनाः अयच्छत्।

# रेलमन्त्री अश्विनीवैष्णवः नव नूतनानां अमृतभारत एक्स्प्रेस् रेलयानानां प्रारम्भस्य घोषणां कृतवान्




रेलमन्त्री अश्विनीवैष्णवः नव नूतनानां अमृतभारत एक्स्प्रेस् रेलयानानां प्रारम्भस्य घोषणां कृतवान्, तेषां शीघ्रमेव ध्वजं पातयिष्यते इति। सोशल मीडिया पोस्ट् मध्ये वैष्णवमहोदयेन उक्तं यत् एतेषु कामाख्या-रोहतक, डिब्रुगढ-गोमतीनगर, न्यू जलपाईगुरी-तिरुचिरापल्ली, न्यू जलपाईगुरी-नागेरकोइल, अलीपुरदुआर-एसएमवीटी बेंगलुरु, अलीपुरदुआर-पनवेल, सन्त्रागछी-तांबरम, हावड़ा-आनन्द विहार टर्मिनल, सीलडाह-वरणासी अमृतः च सन्ति भारत एक्स्प्रेस् रेलयानानि। रेलमन्त्री तेषां मार्गान्नपि सार्वजनिकान् कृतवान् ।

# अद्यारभ्य नवीदिल्लीनगरे २८तमस्य राष्ट्रमण्डलस्य सभापति-अध्यक्षाधिकारिसम्मेलनं आरभ्यते

नवीदिल्लीनगरे २८तमस्य राष्ट्रमण्डलस्य सभापति-अध्यक्षाधिकारिसम्मेलनं आरभ्यते। त्रिदिवसीयसम्मेलने ६० तः अधिकेभ्यः राष्ट्रमण्डलदेशेभ्यः अर्धस्वायत्तसंसदेभ्यः च वक्तारः अध्यक्षपदाधिकारिणः च भागं गृह्णन्ति। अस्य उद्देश्यं संसदीयप्रजातन्त्रस्य विविधरूपेषु ज्ञानं, अवगमनं च प्रवर्धयितुं संसदीयसंस्थानां विकासः च अस्ति । लोकसभा अध्यक्षः ओम बिर्ला सम्मेलनस्य अध्यक्षः अस्ति। सम्मेलनस्य प्रथमदिने अद्य स्थायी समितिः समागमं करिष्यति। २८ तमस्य सम्मेलनस्य अध्यक्षत्वेन बिर्लामहोदयः स्थायीसमित्याः सभायाः अध्यक्षतां करिष्यति। प्रधानमन्त्री नरेन्द्रमोदी श्वः संविधानभवनस्य ऐतिहासिककेन्द्रीयभवने सम्मेलनस्य उद्घाटनं करिष्यति। मोदीमहोदयः राष्ट्रमण्डलस्य अर्धस्वायत्तसंसदानां च अध्यक्षैः पीठासीनाधिकारिभिः च सह अनौपचारिकं संवादं करिष्यति।

# पहाड़ी गल्लां-हिमसंस्कृतवार्ता

## ऊखल़ कुंडी कने सिल बत्तू

सिल बतुये री काहणी सदियां पुराणी
इस्तेमाल करदी थियाँ अम्मा दादी होर नानी
जालूँ बी बणदी थी साबते मांह री दाल़
तां कुंडिया च दरड़ी कने बीहण पिपली जरूर पाणी

ज़्यादा होवे जे पीहणे जो दाल़
तां फेरी उखल़ा री औंदी थी बारी
गुठियाँ भजी जाइयाँ दाल़ पींहदेयां
जे हो नी पीहणे री जानकारी

सिल बतूये री तां गांवां च औंदी थी भ्यागा संजा बारी
मिर्च मसाला सब इत पर ई पीहणा
गांवां री बड़ी सधाहरण जेई थी जिंदगी
कुंडी सिल बतूये ते बिना मुश्किल था जीणा

ब्याह बिच बी सिल बत्तूये री करदे थे पूजा
तियाँ रहणा तियाँ जे सिल बत्तू रहन्दे स्याणे थे गलांदे
इक्की दूजे ते बिना किसी री नी कोई बुक्कत
नवें लाड़ा लाड़िया जो सिल कने बत्तू एहड़ा समझांदे

अज्ज लोकां गे सब कुछ पैसे री नी कोई तंगी
तिस जमाने लोक मेहनती थे बौहत थे कमांदे
सै बी जमाना था तांजे सलूणा नी हुँदा था कोई
लोक लूण पिपली प्याज़ा कने ई रोटी थे खाई जांदे

घर घर मिकसियाँ आई गी हुण सिल बत्तू हुई गया दूर
धरती माता री प्रतीक थी हुई गई माहणुये ते दूर
नवें जमाने कने रहण सहण हुई गया बड़ा अज़ीब
देखा देखिया च मिकसियाँ रखणे जो सब मजबूर

रवींद्र कुमार शर्मा
घुमारवीं
जिला बिलासपुर हि प्र





# मकरसंक्रान्तिपर्वसमीक्षा(पर्वविशेषः)

डॉ विमलेश झा, डीएवी पब्लिक स्कूल बरारी, भागलपुर, बिहार

भारतीयसंस्कृतौ पर्वाणि केवलं उत्सवस्वरूपाणि न सन्ति, अपि तु तानि जीवनदर्शनस्य, ऋतुविज्ञानस्य, खगोलशास्त्रस्य, धर्मस्य, कृषेः च समन्विताः अभिव्यक्तयः भवन्ति। तेषु पर्वसु मकरसंक्रान्तिः विशेषमहत्त्वं धारयति। इदं पर्व सूर्यस्य मकरराशौ प्रवेशसमये आचर्यते। एषा संक्रान्तिः न केवलं कालपरिवर्तनस्य सूचिका, अपि तु उत्तरायणस्य शुभारम्भः अपि मन्यते। अत एव मकरसंक्रान्तिः धार्मिकदृष्ट्या, वैज्ञानिकदृष्ट्या, सामाजिकदृष्ट्या, सांस्कृतिकदृष्ट्या च अत्यन्तं महत्त्वपूर्णा अस्ति।

'संक्रान्ति' इति शब्दः 'सं + क्रम्' धातोः निष्पन्नः, यस्य अर्थः—परिवर्तनम्, संक्रमणम्, एकस्मात् अवस्थायाः अन्यामवस्थां प्रति गमनम् इति। ज्योतिषशास्त्रानुसारं सूर्यः यदा एकस्मात् राशेः अन्यां राशिं प्रविशति, तदा सा तिथिः 'संक्रान्तिः' इति कथ्यते। वर्षे द्वादश संक्रान्तयः भवन्ति, किन्तु तासु मकरसंक्रान्तेः सर्वाधिकं महत्त्वं विद्यते। खगोलशास्त्रमनुसृत्य मकरसंक्रान्तौ सूर्यः धनुराशेः निर्गत्य मकरराशिं प्रविशति। अनेन सूर्यस्य गमनमार्गे दक्षिणायनात् उत्तरायणं प्रति परिवर्तनं दृश्यते। उत्तरायणं भारतीयपरम्परायां शुभकालः मन्यते। उक्तं च धर्मसिन्धोः संक्रांतिनिर्णये-

मकरस्थे दिवाकरे पुण्यकालः प्रकीर्तितः।

**स्नानदानजपैः पुण्यं कोटिगुणं प्रजायते॥**

**अपि च महाभारतस्य अनुशासनपर्वणि-**

**उत्तरायणे पुण्यकाले सूर्ये मकरसंस्थिते।**
**दानं स्नानं जपो होमः सर्वं अक्षय्यतां व्रजेत्॥**

उत्तरायणस्य प्रारम्भः प्रकाशवृद्धेः, ऊर्जावृद्धेः, जीवनोत्साहस्य च प्रतीकः अस्ति। अयं कालः प्रकृतेः नवजीवनस्य, कृषिकार्यस्य च अनुकूलः भवति। वैदिकसाहित्ये सूर्यः देवतारूपेण पूज्यते। ऋग्वेदे सूर्यः 'सविता', 'पूषा', 'मित्रः' इत्यादि नामभिः स्तूयते।तद्यथा -उदुत्यं जातवेदसं देवं वहन्ति केतवः।(ऋग्वेद) सूर्यस्य गतिरेव कालचक्रस्य आधारः अस्ति। अतः मकरसंक्रान्तिः कालबोधस्य, ऋतुपरिवर्तनस्य च प्रतीकत्वेन वेदेषु प्रतिपादितम् । मकरसंक्रान्तिः स्नानदानपुण्यकर्मणां विशेषकालः मन्यते। गङ्गा, यमुना, सरस्वती, गोदावरी, नर्मदा इत्यादिषु नदीषु स्नानं महापुण्यदायकं भवति। विशेषतः गङ्गासागरस्नानम् अस्य पर्वणः प्रमुखं वैशिष्ट्यम् अस्ति।

**उक्तं च स्कन्दपुराणस्य गंगामाहात्म्ये-**

**माघे मकरसंप्राप्ते गङ्गायां यः समाहितः।**
**स्नाति स्नानफलं तस्य सर्वपापप्रणाशनम्॥**

अस्मिन् दिने तिलदानस्य विशेषमहत्त्वं वर्तते। 'तिल' इति शीतनाशकः, पवित्रः, पुण्यप्रदः च मन्यते।तिलविषये उक्तमस्ति **पद्मपुराणस्य उत्तरखण्डे-**

**तिलैः स्नानं तिलैर्होमः तिलैर्दानं तथैव च।**
**तिलैः पितॄन् प्रीणयति मकरस्थे दिवाकरे॥**

मकरसंक्रान्तौ तिलगुडदानस्य परम्परा प्राचीनकालात् प्रवहति। तिलः उष्णगुणयुक्तः, गुडः मधुरस्वभावयुक्तः च विद्येते। तयोः संयोगः जीवनदर्शनं सूचयति कठिनतायां अपि मधुरता धारणीया। लोकवाक्यम्—

तिलगुड घ्या, गोड गोड बोला। अर्थात् तिलगुडौ स्वीकुर्वन्तु,मधुरं मधुरं वदन्तु इति। अनेन सामाजिकसौहार्दस्य, परस्परस्नेहस्य च सन्देशः प्रसरति।

## मकरसंक्रान्तिः भारतदेशस्य विविधप्रदेशेषु विविधनामभिः, विविधरीत्या च आचर्यते—

पञ्जाबराज्ये लोहड़ीति नाम्ना, तमिलनाडुराज्ये पोंगलनाम्ना, असमराज्ये भोगालीबिहूनाम्ना, गुजरातप्रदेशे उत्तरायणम् (पतंगोत्सवः) इति नाम्ना,महाराष्ट्रराज्ये बिहारराज्ये च तिलसंक्रान्तिरिति, हिमाचलप्रदेशे माघीतिनाम्ना इदं पर्व आचर्यते। अस्मिन् पर्वणि कृषि-प्रकृति-सूर्योपासनानां समन्वितरूपं दृश्यते। भारतदेशः कृषिप्रधानः वर्तते।मकरसंक्रान्तिः रबीशस्यानाम् आगमनस्य सूचिका अस्ति। मकरसंक्रान्तेः अनन्तरं शिशिरकालीनशस्यानां कर्तनकार्यं आरभ्यते। कृषकाः अस्मिन् पर्वणि भूमिं सूर्यं वर्षां च प्रति कृतज्ञतां निवेदयन्ति। इदं पर्व कृषकजीवनस्य परिश्रमस्य, आशायाः, समृद्धेः च प्रतीकरूपं विद्यते। इदं पर्व सामाजिकसमरसतायाः पर्व अपि अस्ति। जातिभेदं, वर्गभेदं विस्मृत्य सर्वे जनाः मिलित्वा उत्सवं कुर्वन्ति। दानं, भोजनेषु सहभागिता, अतिथिसत्कारः एतानि सर्वाणि कार्याणि सामाजिकबन्धनं सुदृढं कुर्वन्ति। आध्यात्मिकदृष्ट्या सूर्यः आत्मज्ञानस्य प्रतीकः अस्ति। उत्तरायणं आत्मोन्नतेः मार्गः मन्यते। महाभारते वर्णितम् यत् भीष्मपितामहः उत्तरायणकाले देहत्यागं कृतवान् । उक्तं च महाभारतस्य शान्तिपर्वणि-

**न हि प्राणान् त्यजेद् भीष्मो दक्षिणायनसंस्थिते।**
**उत्तरायणे महापुण्ये देहत्यागं चकार सः॥**

आधुनिककाले अपि मकरसंक्रान्तिः पर्यावरणसंरक्षणस्य,प्राकृतिकसन्तुलनस्य, स्वास्थ्यचिन्तनस्य च सन्देशं ददाति। तिल, गुड, शाकाहारः एते सर्वे ऋत्वनुकूलाः आहाराः सन्ति ।पतंगोत्सवः वायुप्रवाहस्य आकाशस्य च महत्त्वं दर्शयति।

मकरसंक्रान्तिः केवलं पर्व न, अपि तु भारतीयजीवनदर्शनस्य जीवन्तप्रतीकः अस्ति। इदं पर्व सूर्योपासनया, ऋतुबोधेन, सामाजिकसौहार्देन, आध्यात्मिकचेतनया च मानवजीवनं सम्यक् मार्गे नेतुं प्रयासं करोति। परिवर्तनं जीवनस्य शाश्वतसत्यम् इति बोधयन् मकरसंक्रान्तिः मानवमात्रं नवोत्साहेन, नवप्रेरणया, नवजीवनाय प्रेरयति। मकरसंक्रान्तेः शाश्वतः सन्देशः अयम् एव -

"तमसो मा ज्योतिर्गमय"।

अन्ते च-

**सूर्ये मकरसंक्रान्ते लोकाः सन्तु सुखावहाः।**
**क्षयं यान्तु च पापानि वर्धन्तां धर्मसम्पदः॥**

सर्वेभ्यः मकरसंक्रांतिपर्वणः हार्दिक्यः शुभकामनाः। इत्यलम्।

# "लौकिकन्यायकोशः"

## "वृश्चिकवानरन्यायः"

मर्कटः कदापि एकत्र एव उपवेष्टुं न शक्नोति। सः सर्वदा इतस्ततः कूर्दति, झम्पं करोति, भूमौ पतति अन्यानि च कर्माणि करोति। यदि तादृशः मर्कटः वृश्चिकेन दष्टः चेत् तस्य वेदनावशात् सः मर्कटः एकत्र उपवेष्टुम् एव न शक्नोति एवं पूर्वमेव चञ्चलस्य मनुजस्य जीवने वेदना भवति चेत् तत् कृते असह्यं भवति इति भावः।

डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्



# वार्तासंवादः

हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। सत्यमेव, आदौ एकं विनोदपूर्णं वृत्तम्। अन्तर्जाले एकं विवाह-चलच्चित्रं बहुभिः दृष्टम्। तत्र वरमाला-समये वरेण वध्वा च भ्रान्त्या विचित्राः चेष्टाः कृताः। तत् वीक्ष्य जनैः भृशं हसितम्।

**नन्दिनी-** अहो! तत् तु विचित्रा घटना। अधुना फिलिप्पीन्-देशस्य वार्ता श्रूयताम्। तत्र एकया महिलया बुद्धस्य मूर्तिः इति मत्वा काचित् अन्यैव प्रतिमा पूजिता। पश्चात् तया ज्ञातं यत् सा तु हरित-वर्णस्य हास्य-पात्रस्य मूर्तिः आसीत्।

**काव्या-** सत्यम्, सा भ्रान्तिः तु अत्यन्तं कौतुकपूर्णा। इदानीं श्रूयताम्। एकेन उद्यमिना विवाहविषये विज्ञापनसूचना प्रकाशिता। तेन इष्टं यत् तस्य भार्या शाकाहारिणी भवेत्, मदिरा-पानं धूम्र-पानं च न कुर्यात्। एतत् पठित्वा अन्तर्जाले जनाः चर्चारताः भूताः।

**नन्दिनी-** आम, लोके सामान्य-विषयेषु अनावश्यकचर्चाः प्रचलन्ति। अस्तु, इदानीं विज्ञान-वार्ता दीयते। वैज्ञानिकैः एकम् आश्चर्यं दृष्टम्। तैः षष्टिसहस्र-वर्ष-पुरातनाः बाणाः अन्विष्टाः। ते अन्विष्टाः बाणाः विष-युक्ताः। अनेन प्राचीन-मानवानां मृगया-कौशलं प्रमाणितम्।

**काव्या-** अहो! तत् तु महत् आश्चर्यम्। प्राचीनकाले अपि एतादृशं विज्ञानम् भूतम्। अस्तु, अद्यतनी वार्ता अत्रैव समाप्यते। श्वः पुनः मेलिष्यामः। नमो नमः।

**काव्या-** अहो! तत् तु महत् आश्चर्यम्। प्राचीन-काले अपि एतादृशं विज्ञानम् भूतम्। अस्तु, अद्यतनी वार्ता अत्रैव समाप्यते। श्वः पुनः मेलिष्यामः। नमो नमः।

# केन्द्रीयशिक्षामन्त्रिणः धर्मेन्द्रप्रधानस्य अध्यक्षतायां प्रौद्योगिकीविज्ञानशिक्षासंशोधनसंस्थानां राष्ट्रियपरिषदः १३ तमा संगोष्ठी अभवत्

केन्द्रीयशिक्षामन्त्रिणः धर्मेन्द्रप्रधानस्य अध्यक्षतायां ह्यः नवदिल्लीनगरे प्रौद्योगिकीविज्ञानशिक्षासंशोधनसंस्थानां राष्ट्रियपरिषदः १३ तमा संगोष्ठी अभवत्। अस्मिन् सत्रे केन्द्रीयशिक्षामन्त्री शैक्षणिक-शोध-मानकानां उन्नयनं, शासनदक्षतां वर्धयितुं, राष्ट्रियप्रौद्योगिकीसंस्थासु (एनआईटी) तथा भारतीयइञ्जिनीयरिङ्गविज्ञानप्रौद्योगिकीसंस्थासु (आईआईईएसटी) नवीनतां उद्यमशीलतां च अग्रे प्रवर्धयितुं च प्रस्तुतीनां समीक्षां कृतवान् ।